

RNI No.21138/1970

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:13 Issue: 06
September 2026, Price Rs.20/-
No. of pages-24

तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

September 2026

Rs.20/-

## तिरुमलस्थ
## श्रीवेङ्कटेश्वरस्वामिनः वार्षिक ब्रह्मोत्सवाः

14-09-2026 आरभ्य 23.09.2026 पर्यन्तम्



## तिरुमलस्थ
## श्रीवेङ्कटेश्वरस्वामिनः नवरात्रि ब्रह्मोत्सवाः

11-10-2026 आरभ्य 20.10.2026 पर्यन्तम्

| दिनाङ्क | वासरः | प्रातः उत्सवः | रात्रौ उत्सवः |
|---|---|---|---|
| 11.10.2026 | भानुवासरः | ... | सेनाधिपत्युत्सव-अङ्कुरार्पणम् |
| 12.10.2026 | इन्दुवासरः | तिरुच्चि उत्सवः | महाशेषवाहनम् |
| 13.10.2026 | भौमवासरः | लघुशेषवाहनम् | हंसवाहनम् |
| 14.10.2026 | सौम्यवासरः | सिंहवाहनम् | मौक्तिकमण्टपवाहनम् |
| 15.10.2026 | बृहस्पतिवासोरः | कल्पवृक्षवाहनम् | सर्वभूपालवाहनम् |
| 16.10.2026 | भृगुवासरः | आन्दोलिकायां मोहिन्यवतारोत्सवः | गरुडवाहनम् |
| 17.10.2026 | मन्दवासरः | हनुमद्वाहनम् | गजवाहनम् |
| 18.10.2026 | भानुवासरः | सूर्यप्रभवाहनम् | चन्द्रप्रभवाहनम् |
| 19.10.2026 | इन्दुवासरः | स्वर्णरथोत्सवः | अश्ववाहनम् |
| 20.10.2026 | भौमवासरः | आन्दोलिकोत्सवादि चक्रस्नानम् | |



श्रीभगवानुवाच -

# गीतामृतम्

देवान्भावयतानेन ते देवाः भावयन्तुवः।
परस्परं भावयन्तः श्रेयःपरमवाप्स्यथ।।

इष्टान्भोगान्हि वो देवाः दास्यन्ते यज्ञभाविताः।
तैर्दत्तानप्रदायैभ्यो योभुङ्क्ते स्तेन एव सः।।

(भगवद्गीता ३.११,१२.)

११. भावः - एभिः यज्ञैः देवताः तर्पयन्तु। तदा ताः देवताः युष्माकं तृप्तिं ददतु। अन्योन्यतृप्त्या महच्छ्रेयः प्राप्नुत। कर्माण्येव कर्तव्यानि। सदा ब्रह्मनिष्ठायाम् स्थातव्याम्। करणयुतसंस्कारेभ्यः वासनानाशः भवितव्यः।

१२. भावः - यज्ञैः पूजिताः देवताः युष्माकं वर्षादीन् दत्वा प्रियभोगान् दास्यान्ति किल। तद्देवतादत्तानि इष्टभोग प्रदानदेवताभ्यः न दत्तानि चेत् सः भोक्ता चोरः एव।

विशेषांशः - देवकार्यमकृत्वा भोक्ता कृतघ्नः भवति। वायुवर्षसूर्यरश्मिभूम्यादीन् अस्माकं दत्वा ज्ञानञ्च दत्वा रक्षकरूपाणां तासां देवतानां विस्मरणमयुक्तं भवति। यः उपकारं स्मरति सः कृतज्ञः इति कथ्यते।

## सङ्कीर्तनम्

अति शोभितेयं राधा
सततविलासवशा राधा
दर्पकबलबोधा राधा
तर्पणगन्धविधा राधा
दर्प्युतक्रोधा राधा

तारितावरोधा राधा
तारुण्योद्बोधा राधा
धारितानुरोधा राधा
दारितापराधा राधा
तरुणीमरुगाधा राधा
धरासमकुचबाधा राधा
तरणसदनुबोधा राधा
धरणि दुस्साधा राधा
तनुभवगुरुगाधा राधा
स्तनकृतगिरिरोधा राधा
तनुवरवचनसुधा राधा
ध्वनिजनितपिकमेधा राधा
तरुणसखी सविधा राधा
दरशशिरुचिसौधा राधा
तरलिततटिद्विधा राधा
दरहसनवरोधा राधा
धवगर्वनिषेधा राधा
स्तवतत्परविबुधा राधा
द्रवधुनीकृत सुधा राधा

धवमदन व्याधा राधा
तरुणत्व पुरोधा राधा
तरुणस्मर योधा राधा
तरुपशुमणिगुणा धारक बहुल वि
तरण परा बहुधा राधा
दैविकसुखोपदा राधा
द्रावकनिजाभिधा राधा
श्रीवेङ्कटगिरिदेवकृपा मु
द्रावैभवनाथा राधा।

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम् - ४४)





लोकाचरविर्जिताः हस्यतां यान्ति।

# सप्तगिरीशस्य वार्षिक ब्रह्मोत्सवाः

वेङ्कटाद्रिसमं स्थानं ब्रह्माण्डे नास्ति किञ्चन।
वेङ्कटेशसमो देवो न भूतो न भविष्यति।।

ब्रह्मण्डे यत्र कुत्रापि वेङ्कटाद्रिसमं स्थानं नास्ति। इदं कलियुग वैकुण्ठम्। आदिदेवसर्वाधिदेववेदवेद्यश्रीमन्नारायणेन स्वाभीष्टं सानन्दं अभिलषितशिखरमिदम्। इदं परमपावनपुण्यक्षेत्रम्। वेङ्कटाद्रिदर्शनात् पापप्रक्षलनात् जन्मपुनीतं भवति।

एतादृशपवित्रतिरुमल शिखराग्रे अखिलाण्डकोटिब्रह्माण्डनायकस्य श्रीवेङ्कटेश्वरस्य उत्सवाः वर्षे वर्षे प्रवर्तन्ते। उत्सवः तत्सन्निधाने अनुक्षणं प्रवर्तते एव। परन्तु अयं सर्वोत्कृष्टब्रह्मोत्सवः।

सृष्टिकर्ता ब्रह्मा अङ्कुरार्पणं कृत्वा स्वयमुत्सवमिमं निर्वहति। कोटित्रयदेवताभिः ससन्तोषं भुवमागत्य कलियुगवैकुण्ठे वेङ्कटाद्रौ नेत्रपर्वत्वेन समीक्षदुत्सवोऽयम्। मानवैः देवताभिः सम्भूय परमात्मने निर्वहिष्यमानपवित्रोत्सवोऽयम्।

एकवारं दर्शनादेव जन्मसार्थक्यं भवति। एकवारवेङ्कटेशनामकीर्तनादेव पापकर्मविनाशो भवति। अस्मिन्वर्षे स्वामिने द्वौ ब्रह्मोत्सवौ प्रवर्तिष्येते। सेप्टम्बर्मासे वार्षिकब्रह्मोत्सवाः (सालकट्लब्रह्मोत्सवाः) अक्टोबर् मासे नवरात्रिब्रह्मोत्सवाः प्रवर्तिष्यन्ते। वार्षिकब्रह्मोत्सवेषु ध्वजारोहणम्, ध्वजावरोहणं च भविष्यतः। नवरात्रि ब्रह्मोत्सववेषु ध्वजारोहणावरोहणे न स्तः। सर्वत्र गोविन्दनाम श्रवणमेव। सर्वत्र नारायणरूप दर्शनमेव। सर्ववृक्षाः पक्षिणः नारायणनामजपमेव कुर्वन्ति। अङ्गरङ्गवैभवोपेततया अलङ्करणानि प्रदर्श्यन्ते। शेषवाहनमारभ्य आदिपुरुषस्य नित्यं भिन्नभिन्नवाहनेषु स्वामी वीथीपरिभ्रमणं करोति। भक्तेभ्यः दर्शन भाग्यं ददाति।

सर्वत्र गोविन्दनामश्रवणमेव, सर्वत्रापि नारायण रूपदर्शनम्। तिरुमलक्षेत्रं वैकुण्ठप्रतिरूपम्। आर्त्या वेङ्कटमूर्तिदर्शनात् जीवितस्य सत्स्पफूर्तिभवेत्। विश्वचोदकेन परमात्मना आरूढरथचालनभाग्यमपि अस्माकं तदा लभ्यते। अत एव सर्वैः तिरुमलक्षेत्रं प्रतिगन्तव्यम्। अम्बरस्पर्शिब्रह्मोत्सवकोलाहलध्वनिषु अस्माभिः भागस्वामिभिः भाव्यम्। स्वामिनः वार्षिकब्रह्मोत्सवेषु भागस्वामिनः ये नभवन्ति ते नवरात्रिब्रह्मोत्सवेषु भागं गृहीत्वा स्वामिनः अनुग्रहपात्राः भवन्तु। स्वामिने आत्मानं नैवेद्यं कृत्वा आत्मार्पणं कर्तव्यम्।

एतेषु ब्रह्मोत्सववेषु श्रीपतिदर्शनार्थमागतेभ्यः सर्वेभ्यः भक्तेभ्यः सर्वसौकर्यप्रकल्पनाय तिरुमलतिरुपति देवस्थानं सर्वप्रयत्नान् करोति। भक्तैरपि देवस्थानाय सहकृतिः देया। मानवजन्मप्राप्तित्वात् परमात्मना प्राणशक्तिप्रदानात् महावेगेन तिरुमलक्षेत्रं प्राप्तव्यम्। माधवस्य प्रवर्तमानब्रह्मोत्सवेषु ब्रह्मपार्श्वपीठं मानवानामेवेति वक्तव्यम् प्रकटनीयश्च।

नयनफलतया वेङ्कटेशदर्शनं करिष्यामः। वदनफलतया गोविन्दनामोच्चारणं करिष्यामः, देवताभिस्सह कण्ठं मेलयित्वा वेङ्कटेशसमो देवो न भूतो न भविष्यति इति विनम्रतया नमस्करिष्यामः।

।।ओं नमो वेङ्कटेशाय।।



वेङ्कटाद्रिसमं स्थानं ब्रह्माण्डे नास्ति किञ्चन ।
वेङ्कटेशसमो देवो न भूतो न भविष्यति ॥


तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका



गौरवसम्पादकः-
श्री मुद्दाड.रविचन्द्र, I.A.S.,
कार्यनिर्वहणाधिकारी,
ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः( F.A.C.)
डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D., P.G.Dip in JMC

मुद्रापकः -

श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयकेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः,
सहायक-छायाचित्रग्राहकः, ति.ति.दे.

सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
— प्रधानसम्पादकः



स्वस्तिश्री चान्द्रमानश्रीपराभवनामसंवत्सर श्रावणबहुलचतुर्थी मङ्गलवारादारभ्य-
भाद्रपदबहुलचतुर्थी-बुधवारपर्यन्तम् - २०२६

## सेप्टम्बर् - २०२६

सम्पुटिः-१३ सञ्चिका-०६



कृष्णाष्टमी 06
- आचार्य जि.पद्मनाभम्

बलरामजयन्ती 09
- डा.पि.माधवी

अनन्तपद्मनाभव्रतम् 15
- डा. के.कोटेश्वरय्य

वामनजयन्ती 17
- डा.यन्.गुणवती

सङ्कष्टहरव्रताचरणम् - श्रीकृष्णे निन्दापरिहारः 18
- डा. वि.माधवरेड्डि

गोवर्धनगिरिधारी (चित्रकथा) 20
- डा. के.सूर्यनारायणरेड्डि

द्वादशराशीनां फलानि 22
- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः


मुखचित्रम् - तिरुमलस्थ श्रीवेङ्कटेश्वरस्वामिनः ध्वजारोहणम्।
अन्तिमपुटचित्रम्:- तिरुमलश्रीमलयप्पस्वामिनः रथोत्सवः।


## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.
दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
प्रधानसम्पादकः,
०८७७ - २२६४३६३
सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -
sapthagiri_helpdesk@tirumala.org



एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-







# कृष्णाष्टमी

- आचार्य जि.पद्मनाभम्, चरवाणी -९२४७३२८२८६

श्रावणबहुलाष्टमी एव कृष्णाष्टमीपर्वदिनम्। मङ्गलाव्रतमपि अस्मिन् दिने निर्वहन्ति। कृष्णस्य जन्मदिनोत्सवसन्दर्भपर्वत्वात् इदं जन्माष्टमीपर्व इत्यपि व्यवहरन्ति। कृष्णस्य बाल्यकालः गोकुले व्यतीतः। अतः गोकुलाष्टमीकृष्णजयन्तीत्यपि व्यवहरन्ति।

श्रीकृष्णः द्वापरकलियुगसन्धिकाले शुक्लसंवत्सरे श्रावणमासे बहुलपक्षे रोहिणीनक्षत्रे अष्टम्यां यामद्वय रात्रिसमये कारागारे मातुलगण्डतया जातः। कृष्णाष्टम्यां तिलामलकपिष्टेन शरीरलेपनं कृत्वा स्नातव्यम्। तुलसीदल युक्तजलेन आचमनं कर्तव्यम्। उपवासेन तद्दिनं यापनीयम्। सायंसमये गृहमध्ये गोमयेन रङ्गवल्ली चित्रीकर्तव्या। तस्यां रङ्गवल्यां तुण्डुलं निक्षिप्य मण्टपं निर्मीय नूतनकुम्भः निवेशनीयः। नवकुम्भः गन्धपुष्पाक्षताभिः अलङ्कर्तव्यः। कुम्भस्य वस्त्राच्छादनञ्च कर्तव्यम्। कलशे बालकृष्णप्रतिमा प्रतिष्ठापितव्या। आदौ देवकीदेवीप्रार्थना, पश्चात् कृष्णप्रार्थना, अर्धरात्रिपर्यन्तं पूजा, क्षीरदधिनैवेद्यं देयम्। ततः चन्द्रोदयसमये बहिरागत्य तत्र अलङ्कृतभूमौ फलपुष्पचन्दनयुतशंखेन उदकं गृहीत्वा चन्द्राय अर्घ्यं देयम्। पश्चात् शंखे नारिकेलोदकं गृहीत्वा कृष्णाय अर्घ्यं देयम्। तस्यां रात्रौ भगवत्कथाभिः जागरणं कृत्वा अनन्तरदिने भोजनं स्वीकर्तव्यम्।

**व्रताचरणविधानम् -** कृष्णाष्टमीमहाव्रतदिनमिदम्। उपवासपूजाजागरणकरणीयदिनेषु इदमेकम्। व्रतविधानं पाञ्चजन्यपत्रिकायां केनचिद्भक्तेनैवं प्रोक्तम्। आस्तिकेन प्रतिमानवेन स्वव्यापारसम्बन्धकर्माणि परित्यज्य नदीस्नानमाचर्य मन्त्रजपं कृत्वा पूजासामग्रीं यथाशक्ति संसिद्धां कृत्वा श्रीकृष्णदेवकीदेवबलरामादीनां प्रतिमाः मृण्मयाः चित्रमयाः वा सम्पाद्याः। एकस्मिन् पीठे गणपतिप्राणप्रतिष्ठा पर्वूकं पुरुषसूक्तविधानेन परिवारसहितस्य श्रीकृष्णस्य सहस्रनामपूजावश्यकनिवेदनादीनि प्रतियामे सूर्योदयपर्यन्तं समर्पणीयानि। पक्वमाषपिष्टेन शर्करां मेलयित्वा कायं कृत्वा देवक्यै निवेदनं कर्तव्यम्। भागवतपुराणभजनादिभिः जागरणं कर्तव्यम्। कृष्णजननघण्टायां चन्द्राय अर्घ्यं देयम्। तदनन्तरदिने भगवत्पूजापूर्वकं अन्नदानानन्तरं पारणं कृत्वा व्रतं परिसमाप्यम्।

**बाललीलापूजा -** मातृप्रियपर्वदिनेऽस्मिन् मातृहृदयेषु ममतावर्धकमिदं पर्वेति गणनीयम्। कृष्णबाल्यचेष्टाज्ञापक पूजाभाजनपर्वदिनमिदम्। पापपुण्यरहित ब्रह्मस्वरूपबालकेषु द्योत्यमानदिव्यत्वस्फोरककार्यकलापपर्व एव कृष्णाष्टमी। बालकृष्णपूजादिनमिदम्। कलियुगप्रम्भादद्य पञ्चसहस्रवर्षाः अतीताः। योगीश्वरेश्वरराजकीयधुरन्धरः परमात्मा प्रपञ्चप्रसिद्धगीताप्रवक्तेति ख्यातिमवाप। कृष्णचरितस्य अष्टमीसंख्यायाः सन्निहितसम्बन्धः वर्तते। कृष्णजन्म अष्टमीतिथिः। दशावतारेषु कृष्णावतारः अष्टमवसुदेवस्य अष्टमपुत्रः कृष्णः, प्रधानाष्टमहिषीपतिः।

**द्वापरयुगे कृष्णस्य चरितम् -**

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगेयुगे।।

इति उक्तरीत्या महाविष्णुः नवमावतारत्वेन यादववंशे देवकीदेवयोः जातः। शूरसेनस्य दशपुत्रेषु वसुदेवः एकः। अयं देवकीं परिणीतवान्। अस्य द्वितीया भार्या रोहिणी बलरामस्य माता। श्रीकृष्णस्य पूर्वजन्मानि वरुणशापात् पत्नीसहितः कश्यपः अदितिसुरसावसुदेवौ वसुदेवदेवकीरोहिणीत्वेन जाताः। तयोः पुत्रत्वेन जातः महाविष्णुरपि शापवशात् एतयोः कृष्णत्वेन अजायत।

**श्रीकृष्णजननम् - कंसवधम् -** वसुदेवः उग्रसेनपुत्रिकां कंसस्य सोदरीं देवकीं पर्यणैषीत्। कंसः रथे तावानयन्

मार्गे आकाशवाणीवचनात् देवक्यष्टमगर्भजातः कंसं हरिष्यतीति शुश्राव। झटिति तां हन्तुं कंसे सन्नद्धे वसुदेवः तस्याः जातां सन्ततिं स्वाधीनीकरिष्यमीत्यवोचत्। कंसः देवकीवसुदेवौ कारगारबद्धौ चकार। कंसजन्मवृत्तान्तं ज्ञात्वा पितरमपि बबन्ध। देवासुरयुद्धे १०० वर्ष पर्यन्तं प्रवृत्ते इन्द्रेण महाविष्णुः चक्रायुधेन तस्यः शिरः खण्डयासमास। भृगुः स्त्रीहत्यापातकाचरणात् महाविष्णुं शशाप। कृष्णजन्मकारणमिदमेवेति देवीभागवतवचनम्। कारागारे देवक्याः षट्पुत्रान् - कंसः जघान। पश्चात् अनन्तांशेन जाते बलरामे महाविष्णुप्रोक्तरीत्या मायादेवी देवकीगर्भस्थशिशुं यशोदागर्भे प्रवेशयामास। सप्तमगर्भस्त्रावः अभूदिति तदा कंसः मेने। सिंहराशौ श्रीकृष्णः अष्टमगर्भत्वेन जातः विष्णुरूपेण दर्शनं दत्वा वसुदेवमुद्दिश्य आत्मानं गोकुले यशोदापुत्रीं प्रसूतवतीति मां नीत्वा तत्र निवेश्य मां अत्र देवकीपार्श्वे निवेशय इत्युक्त्वा झटिति शिशुर्बभूव। ततः वसुदेवः नन्दगोप भार्यायशोदापार्श्वस्थशिशुं अत्र आनीय श्रीकृष्णं यशोदापार्श्वे निवेशयामास। कंसः अष्टमगर्भजातः शिशुः स्त्रीः इति तां शिलायां प्रहर्तुमारेभे। तदा बालिका आकाशं प्रति लंघयित्वा तव शक्तिंस्त्रीषु मा प्रदर्शय, तव हन्ता अन्यत्र वर्धते इत्युवाच। **कृष्णस्य बाल्यम् -** कंसः आकाशवाणीवचनानि श्रुत्वा राज्ये नवजातपुत्रान् हन्तुं अनुचरान्नियुयोज।

**पूतनामरणम् -** पूतनागोपस्त्रीत्वेन आगता। कृष्णः विषक्षीरेण सह तस्याः रक्तमपि पीत्वा तां विगतनिजरूपधारिणीं अचेतनाञ्चकार।

**शकटासुरवधम् -** पश्चात् कंसप्रेषितराक्षसे शकटरूपेण घोरशब्देन सह कृष्णोपर्यागते तच्छकटं खण्डशः कृत्वा तं राक्षसं जघान।

**तृणावर्तासुरवधम् -** कंसपक्षतः तृणावर्तासुरतृणावर्तरूपेण श्रीकृष्णं तं परिवृतः स्वाकारं अनूह्यभारवत्तमञ्चकार। भार मसहमानः तृणावर्तः अम्रियत।


**वत्सासुरवधम् -** अन्यकंसप्रेरिते राक्षसे वत्सासुरे गौः भूत्वा कृष्णपालितगोसमूहे सञ्चरति सति ज्ञात्वा तस्य पादौ वृक्षे प्रहारात् सः अम्रियत। ततः सरस्तीरमागतं गोपकुलनिगरणाय यतन्नं बकासुरं कृष्णः तन्मुखे प्रविश्य ततः उदरं प्रविश्य विदीर्य मुखादेव बहिराजगम। ततः बकः रक्तस्रावेण अम्रियत।

**अघासुरवधम् -** बकसोदरः अघासुरः सर्पोभूत्वा गोपालनिगरणाय प्रयत्नं चकार। तदा बलरामकृष्णाभ्यां मुखे प्रविश्य उदरविदारणात् अघासुरोऽपि रक्तस्रावादम्रियत। बलरामकृष्णौ उदरात् बहिराजग्मतुः।

**कृष्णस्य शौर्यगाथाः -** कृष्णः मृदं चखादेति गोपिकावचनात् यशोदया पृष्ठः बालकृष्णः मुखमुद्घाट्य स्वमुखे यावत्प्रपञ्चं दर्शयामास। ब्रह्मा विष्णुमायापरीक्षार्थं गोपालपशून् सर्वान् नीत्वा अदृश्याञ्चकार। गोवर्धनगिरिपरितः गोपालेषु अदृष्टेषु दिव्यशक्त्या कृष्णः ज्ञात्वा गाः गोपालाश्च ससर्ज। तदा ब्रह्मा गोवर्धनगिरौ सर्वेषु गोषुविष्णुरूपं अन्यं ब्रह्माणञ्च दृष्ट्वा आश्चर्यचकितः अपराधं क्षमस्वेति कृष्णं प्रार्थयमास। तदा कृष्णः करुणया निजरूपं ब्रह्मणे दर्शयामास। ततः कृष्णः कालिन्दीनदीतीरे सञ्चरन् धेनुकासुरं जघान।

**कालीयमर्दनम् -** गरुत्मद्भीतः कालीयसर्पः कालिन्द्यां निवसति स्म। तद्विषप्रभावात् जले कलुषिते नदीजलपानात् गोषुमृतेषु तीरस्थवृक्षेष्वपि शुष्कीभूतेषु कृष्णः वृक्षमधिरूह्य जलस्थ कालियसर्पशिरस्यधिरूढः तं प्रहार्य मर्दयित्वा तस्मिन् नृत्यञ्चकार। शरणागतः कालीयः कालिन्दीजलाशयं परित्यज्य रमणकद्वीपङ्गाम। अङ्गिरसशापात् महासर्पभूतं शापविमुक्तञ्चकार। ततः कृष्णः कंसप्रेरितं अरिष्ठासुरं वृषभरूपस्थं अश्वरूपस्थं केशिनं अजारूपस्थं व्योमासुरं जघान।







**कंसवधम् -** अक्रूराह्वानात् आयुधपूजार्थमाहूतः कृष्णः अक्रूरादेव कंसवञ्चनामन्त्राङ्गं ज्ञात्वा मधुरापुरं गत्वा युद्धविद्याप्रदर्शनात्पूर्वमेव प्रेषितं कुवलयापीडगजं गजचालकञ्च जघान। युद्धविद्याशालां प्रविश्य चाणूरं जघान। बलरामश्च मुष्टिकं जघान। एतयोर्मरणात् स्वयमुग्रोभूत्वा आगतं कंसं गदया तं जघान। देवकीवसुदेवोग्रसेनान् कारागारात् मोचयित्वा उग्रसेनं मधुराधिपतिञ्चकार।

**बलरामकृष्णविद्याभ्यासः -** गर्गसूचनया बलरामकृष्णौ सान्दीपाश्रमं विद्याभ्यासार्थं जग्मतुः। कृष्णः कुचेलेन स्नेहं कृत्वा आश्रमे एव चतुष्षष्टिकलाविशारदः बभूव।

**गुरुदक्षिणा -** विद्याभ्यसानन्तरं गुरुः सान्दीपनिः स्वपुत्रः प्रभासतीर्थजले निमग्नः अदृश्यः बभूवेति तमानीय समर्पयेति गुरुदक्षिणारूपां दक्षिणां दातुं कृष्णमपृच्छत्। गुरुपुत्रमर्पयितुं कृष्णेनपृष्टः वरुणः पञ्चजनराक्षसः गुरूपुत्रं जघानेति विषयं ज्ञात्वा कृष्णः समुद्रे शङ्खरूपं पञ्चजन्यराक्षसं जघान। तत् शंखमेव पाञ्चजन्यशंखम्। ततः यमलोकं गत्वा यमात् गुरुपुत्रं सजीवं कृत्वा गुरवे दक्षिणारूपेण ददौ। द्वारकायां बाल्यमित्रे कुचेले आगते तंसम्मान्य स्नेहप्राबल्यात् अकिञ्चनं महासम्पन्नञ्चकार।

**द्वारकनगरनिर्माणम् -** कंसमातुलः जरासन्धः कंसस्य मरणम् सुतानां बाधां ज्ञात्वा मधुरामाक्रमितुं आजगाम। कृष्णः आकाशवाणीद्वारा जरासन्धवधमसाध्यमित्यजानीत्। जरासन्धः स्नपौत्रार्थं युद्धं प्रारेभे। कृष्णः यादवबलं क्षीणं भवेदिति ज्ञात्वा श्रृगालवासुदेवं हत्वा तद्धनेन द्वारकाद्वीपे विश्वकर्मणा द्वारकानगरं निर्माय सुखं जीवनं यापयतिस्म।

**बलरामकृष्णविवाहः -** बलरामः अनर्तपुत्रिकां रेवतीं पर्यणैषीत्। श्रीकृष्णः रूक्मिणी, जाम्बवती, सत्याभामा, कालिन्दी, मित्रविन्दा, सत्यभामा, भद्रानामक वधूः परिणीय नरकासुरेण कारागारस्थान् १६००० गोपिकाः स्वभार्यात्वेन परिजग्राह। ततः घण्टाकर्णं शापविमुक्तञ्चकार। नरकासुर मुरासुरौ, बाणासुरं, पौण्ड्रकवासुदेवौ अवलीलया जघान।

**पाण्डवैः मैत्री -** ततः कृष्णः निर्विरामं यज्ञानि कारयामास। धर्मराजेन राजसूययागं कारयामास। भीमेन सहमधुरां गत्वा भीमेन जरासन्धं हतञ्चकार। राजसूययागसमये शिशुपालमवधीत्। द्रौपदीवस्त्रापहरणसमये तां ररक्ष। अभिमन्युविवाहे भागस्वामी बभूव। कौरवैः पाण्डवेभ्यः अर्धराज्यभागसमर्पणनिराकरणात् कौरवसभां गत्वा निष्फल सन्धिप्रयत्नञ्चकार। कर्णस्य तज्जन्मवृत्तान्तं विज्ञाप्य पाण्डवेषु तस्य ममकारजनने कृतकृत्यः बभूव। कुरुक्षेत्रे कौरवसैन्यं दृष्ट्वा बन्धुनाशभीताय अर्जुनाय कर्मसिद्धान्तं स्वधर्णाचरणं बोधयित्वा कर्तव्योन्मुखञ्चकार। तद्बोधः एव भगवद्गीतेति जगत्प्रसिद्धिरागता। युद्धानन्तरं पण्डवेभ्यः हस्तिनापुरं समर्प्य द्वारकांप्रत्युज्जगाम। अश्वत्थाम्नः ब्रह्मास्त्रात् उत्तरागर्भे शिशौमृते हस्तिनापुरं गत्वा तं सजीवं कृत्वा द्वारकां पुनराजागम। उत्तरागर्भस्थः पुनरुज्जीवितः परीक्षिन्महाराजः।

**कृष्णस्य निर्याणम् -** कुरुक्षेत्रे वीराधिवीरबन्धुमरणाय, युद्धप्रवर्तनाय कृष्णः एव कारणमिति गान्धारी "मम भर्तुसेवा यदि पवित्रा स्यात् तया पातिव्रत्यशक्त्या त्वां शपामीति ३६ वर्षानन्तरं यादववंशः विनष्टो भूत्वा स्वस्त्रीजनविलापो भवेदिति" शशाप (महाभारतम्)।

**३६ वर्षानन्तरं मुनिशापः -** विश्वामित्रनारदकण्व महर्षयः द्वारकामागताः। तदा साम्बेन स्त्रीवेषं धारयित्वा गर्भिणीयं पुरुषो वा स्त्रीः वा जनिष्यतीति मुनीन् पप्रच्छुः। परिहास प्रश्नात् क्रुद्धाः मुनयः मुसलः जनिष्यतीत्यवोचन्। कृष्णः कालनिर्णयानुगुणं यद्वाभवत्विवोचत्। साम्बः आयसमुसलं जनयामास।

**यादवनाशः -** श्रीकृष्णबलरामोद्धवाः पुण्यतीर्थायात्रां जग्मुः। यादवाः मद्यं पीत्वा साम्बद्वारा जातायसमुसलं खण्डशः कृत्वा समुद्रे पातयामासुः। तत् तृणायुधानि बभूव। तैः तृणायुधैः परस्परं युद्धं कृत्वा सर्वे यादवाः मृताः। श्रीकृष्णः स्वपरिवाराय स्वनिर्गमनमुक्त्वा बलरामं द्रष्टुं जागम। ततः पूर्वमेव बलरामात्मा शरीरात् बहिरागत्य श्वेतसर्पोभूत्वा पातालं जगाम। निश्चलमनस्केन योगमुद्रया श्रीकृष्णेन पादे उत्थिते सति जरानामराक्षसः कृष्णं हरिणः इति मत्वा बाणप्रयोगात् पादाहतः कृष्णः प्राणान्त्यक्त्वा विष्णुरूपे स्वर्गं जगाम। श्रीकृष्णनिर्याणानन्तरं अर्जुनः द्वारकमागत्य कृष्णस्य कर्मकाण्डं निर्वाहयामास।

**कृष्णं कमलपत्राक्षं पुण्यश्रवणकीर्तनं।**
**वासुदेवं जगद्योनिं नौमिनारायणं हरिम्॥**

# बलरामजयन्ती

- डा. पि.माधवी
चरवाणी - ५११९८०४७८४



ति.ति.देवस्थानप्रकटितवार्षिकपञ्चाङ्गे प्रकटितपर्वदिनेषु आगस्ट् १३ तिथौ बलरामजयन्तीति निर्दिष्टम्। परमेश्वरः श्रीकृष्णः सकलावताराणां मूलपुरुषः। बलरामः तस्य द्वितीयं शरीरम्। द्वावपि एक शरीरमेव। द्वयोर्मध्ये भेदः केवलं रूपमेव। बलरामः श्रीकृष्णस्य प्रथमशरीरकविस्तरणम्। बलरामः श्रीकृष्णस्य दिव्यलीलासु सहायकारी। वसुदेव संकर्षणप्रद्युम्न अनिरुद्ध, इति चतुर्व्यूह चतुः रूपेषु सृष्टिकार्याणि करोति। सृष्टिकार्येषु श्रीकृष्णाज्ञामनुसरति। शेषरूपे श्रीकृष्णं विविध रूपेषु सेवते। सर्वेषु रूपेषु श्रीकृष्णस्य सेवाकरणे दिव्यानन्दमनुभवति। बलदेवस्य करुणया विना कोऽपि कृष्णं प्राप्तुं न शक्नोति।कृष्णस्य भौतिकप्रपञ्चे अवतरणे सति स्वानुचरैः परिवारैः आगच्छति। पञ्चसहस्रवर्षपूर्वं बलरामः कृष्णभौतिकावतारात् पूर्वमेव आगतः। बलदेवस्य करुणाप्रसदानन्तरमेव कृष्णः अवततार। कृष्णबलरामयोः सम्बन्धः तादृशः। षोडशवर्षपूर्णः बलरामः यौवनतेजसा प्रकाशते। तस्य छाया स्फटिकवद्भासते। सः नीलवस्त्राणि धृत्वा पुष्पमालालङ्कृतो भवति। रमणीयशिरःकेशान् रमणीयतया (बध्नाति) एकत्रकुरुते। सः अद्भुतकर्णाभरणयुतः कण्ठे पुष्पमालायुतः रत्नहारैः वैभवतया अलङ्कृतः दृश्यते। बलरामः सुन्दरःमहाबलिष्टः-अद्भुतबाहुबलयुतः। तस्य पादौ रत्नकिङ्किणीभिः अलङ्कृतौ दृश्येते।



कपोलस्पृशत्कर्णाभारणैः, कस्तूरीतिलकेन च भासमानः विशालवक्षःस्थलगुञ्जमालालङ्कृतः भवति। अयं गम्भीरस्वरेण ऊरुस्पर्शिदीर्घबाहुयुतश्च भाषते। अस्य तेजः कोटिसूर्यप्रकाशमतिशेते। अपारशक्तियुतस्यास्य परिमलमेव राक्षससंहरणाय पर्याप्तं भवति। सोदरकृष्णस्य अतीन्द्रियशक्तिमधिकृत्य ज्ञातोऽपि कृष्णप्रेम्णा कृष्णमटव्यां एकाकिनमकृत्वा सर्वदा सहैव वर्तते बलरामः। कृष्णस्य अत्यन्तप्रियस्नेहितः सन् कृष्णलीलाभाण्डागारः भवति।

**बलरामस्यलीलाः -** बलरामः धेनुकासुरं, प्रलम्बासुरं जघान। श्रीकृष्णः बलरामं सदा कीर्तयति।बलरामस्य मार्गादानात् यमुना नदी शिक्षिता आसीत्। बलरामः रेवतीं परिणिनाय। भीमेन दुर्योधनस्य वञ्चनासंहरणात् बलरामः भीमे कुपितः। परन्तु पश्चात् श्रीकृष्णः तं शान्तं चकार। व्यासं सम्यक् प्रतिनिधित्वाकरणात् बलरामः रोमहर्षणं जघान।

**बलरामस्य दया -** भौतिकप्रपञ्चसृष्टौ, आध्यात्मिकप्रपञ्चनिर्वहणे व्यक्तिगतकार्येषु कृष्णसेवाकरणेन बलरामः तं तोषयति स्म। बलरामकृष्णसेवाकरणमेव एकैकध्येयममन्यत। श्रीरामस्य लक्ष्मणवत् श्रीकृष्णस्य शाश्वतसहचरः आसीत्। अयमेव आदिगुरुः। आध्यात्मिकपुरोगति साधनाय प्रथमं बलरामकरुणा सर्वेषामावश्यकी। बलरामद्वारैव कृष्णसामीप्यं प्राप्तुं शक्यते। बलरामस्य निजस्वरूपस्य प्रतीकः गुरुरेव। बलरामगुरोरुपादेशान् अनुसरणद्वारा वयं कृष्णानुग्रहं प्राप्स्यामः। जगन्नाथसम्प्रदाये कृष्णस्य अग्रजः अयं हिन्दूदेवः कोटित्रयदेवतास्वयं प्रधानः। अयं हलधरः हलायुधः बलदेवः बलभद्रः सङ्कर्षणः इति आहूयते।

प्रथमविशेषणद्वयं व्यवसायसम्बन्धि। व्यवसायकारिषु तस्य बलसम्बन्धकारणत्वात् तस्य

हलानुबन्धं सूचयति। अवसरेप्राप्ते व्यवसायपरिकरायुधत्वेन उपयुक्तदेवतात्वेन, ततः विशेषणद्वयं तस्य बलं सूचयतः। अयं बलरामः व्यवसायदेवतेयं। विष्णुदेवसम्बन्धे सर्परूप शेषावतारत्वेन वर्णितः। केषचिद्वैष्णवसम्प्रदायेषु विष्णोः अष्टमावतारत्वेन बलरामं भावयन्ति गीतगोविन्दे क्रि.श.१२०० विष्णोः दशावतारेषु बलरामं नवमावतारत्वेन देवताराधनेषु गर्णयन्ति।

भारतीयसंस्कृतौ बलरामाख्यस्य बहव मूलाधाराः सन्ति। तस्य चित्रं साधारण शकारम्भे कि.पूर्व द्वितीय शताब्दसम्बन्धि दृश्यते। सर्वत्रापि सः कर्षकदेवः।

**पाठाः -** बलरामकथाः महाभारते, हरिवंशे भागवतपुराणे अन्येषु पुराणेषु च दृश्यन्ते। अयं शेषलक्ष्मणदेवताभिः सह सङ्कर्षणव्यहावतारत्वेन प्रसिद्धः। बलरामस्य गाथा विष्णोरनुबन्धतया प्रतिबिम्बत्वेन दृश्यते। महाभारते अनेकपर्वसु बलरामगाथा दृश्यते। वनपर्वणि कृष्णः तमधिकृत्य कथयन् सः विष्णोरवतारः इति सकलावतारसृष्टेः मूलमितिकथयति। कौटिल्यस्य अर्थशास्त्रेऽपि बलरामप्रस्तावना क्रि.पू. ४-२ शताब्दमध्यकाले दृश्यते। क्रि.पू. १८५-१७० काले इण्डोग्रीकूराज अगथाक्लेसू नाणकेषु बलरामप्रतिमाः संकर्षणत्वेन प्रसिद्धाः। दक्षिणहस्ते गदां वामहस्ते हलं धृत्वा तिष्ठतीव चित्रितः। नाणकेषु पार्श्वे वासुदेवकृष्णः शंखचक्रधारित्वेन चित्रितः। क्रि.पू.१-२ शताब्दचित्रेषु हलेन सह मुसलधारी इत्यपि चित्रितः प्राचीन भारतीयकलाग्रन्थेषु पञ्चवृष्णिवीरेषु बलरामकृष्णौ दृश्येते।

**पुराणगाथा -** वसुदेवकुमारः बलरामः हिन्दूगाथाः अनुसृत्य बलरामे गर्भे विद्यमाने विष्णुः तस्य पिण्डं देवकीगर्भात् वसुदेवस्यप्रथमपत्नीरोहिणीगर्भे परिणामञ्चकार। संकर्षणः बलरामः कृष्णेन सह पोषकपुत्रत्वेन नन्दयशोदागृहे अवर्धत। भागवतपुराणे दशमाध्याये एवं विव्रियते। - सर्वस्यपि आत्मस्वरूपः भगवान् बलरामकृष्णत्वेन स्वजन्मसम्बन्धि स्वप्रणालिकामधिकृत्य एकीकृतचैतन्यस्य योगमायायाः सृजनात्मकशक्तिं ज्ञापयति। सा स्रष्टिः बलरामेण प्रारभ्यते। मन्निवासशेषभूमिः सर्वा देवकीगर्भे एकपिण्डत्वेन परिणमते। तत् त्वं रोहिणीगर्भे परिणमितव्या इति योगमायामुवाच भागवतपुराणम् (१०-२-८ अनुवादः डि डेन्निस् हड्सन्)

आदौ बलरामस्य राम इति नाम। तस्य अतिबलकारणात् बलराम बलदेव बलभद्र इति नामान्यागतानि। बलवान् रामः बलरामः श्रावणपौर्णिमायां जातः। एतद्दिनं रक्षोबन्धदिनेन एकी भवति।

**बाल्यं, विवाहश्च -** कृष्णबलरामयोः नामकरणाय नन्देन आहूतः गर्ग महर्षिः ''कंसः देवकीपुत्रंहननायगर्भमन्विषति। अतः वैभवेन विना रहस्यतया नामकरणकार्यं कर्तव्यमिति'' सूचयामास। नन्दः तथैव निराडम्बरतया तत्कार्यं निर्वाहयामास। रोहिणीपुत्रः बलरामः दिव्यानन्दप्रदः असाधारण बलत्वात्



बलरामः इत्याहूयमानः यादवान् स्वादेशनुकूलत्वेन आकर्षतीति संकर्षणः अजायत। भागवतपुराणमनुसृत्य क्रीडाविवशे बलरामे एकगोपालाङ्के विद्यमाने सति भगवान् श्रीकृष्णः तस्य पादमर्दनं कृत्वा सेवयामास इति वर्णितम्।

**श्रीमद्भागवतम् - (१०-१५ श्लोकः)**

बलरामः स्वबाल्यकृष्णेन सह गोपालत्वेन कालं यापयामास। कंसप्रेषित धेनुकासुरं प्रलम्बमुष्टिकमल्लयोधौ जघान। कृष्णेन कंसे हते तदैव बलरामः महाशक्तिवन्तं तस्य सेनाधिपतिं कालवक्रं जघान। ततः बलरामकृष्णौ विद्याभ्यसार्थं उज्ञयिन्यां सान्दीपान्यश्रमं जग्मतुः। ततः बलरामः ककुद्मिराज्ञः पुत्रिकां रेवतीं परिणिनाय। बलरामस्य निशातः, उन्मुखः, इति द्वौ पुत्रौ वत्सला अथवा शशिरेखेति एका तनया आसीत्। कर्षकः बलरामः कृष्णसम्बन्धपशुसम्पदा व्यवसाय प्रतिरूपः। हलायुधः अयं असुरसंहाराय यमुनानदीं बृन्दावनसमीपानयनाय मार्गं खननाय हस्तिनापुरराजधानीं सर्वां गङ्गानद्यां मेलयितुं स्वहलायुधमुपयुयोज।

**कुरुक्षेत्रयुद्धम् -** बलरामः दुयोधनभीमयोः गदा युद्धविद्यामध्यापयामास। कौरवपाण्डवयुद्धे उभावपि पक्षौ, बन्धू इति तटस्थः बभूव। युद्धसमये जामातृप्रद्युम्नेन अन्ययादवैः सह तीर्थयात्रां गत्वा शिष्यमध्ये युद्धं द्रष्टुं अन्त्यदिने आगतः। भीमेन दुर्योधनोरसिगदाघातः युद्धनियमसम्प्रदायविरुद्ध चर्येति भीममपि हनिष्यामीति प्रोवाच। तदा दुर्योधनेन द्रौपद्यै ऊरुदर्शनात् तत्समये ऊरौप्रहार्य दुर्योधनं हनिष्यमीति भीमप्रतिज्ञां कृष्णः स्मारयित्वा बलरामं उपशान्तञ्चकार।

**अदृश्यता -** यादववंशनाशयुद्धे भागो भूत्वा कृष्णादृश्यानन्तरं ध्यानस्थितौ लोकमिमं तत्याज। अन्त्यकाले बलराम वदनात् श्वेतशेषः बहिरागतः अदृश्यः अभूदिति सः एव आदिशेषः इति सः समीपगुहांप्रविश्य पातालं जगामेति केषुचिद्ग्रन्थेषु वर्णितम्।

।।वन्दे बलरामकृष्णौ।।



रात्रौ - महाशेषवाहनम्
15.09.2026 भौम्यवासरः

प्रातः - लघुशेषवाहनम्
16.09.2026 सौम्यवासरः

रात्रौ - हंसवाहनम्
16.09.2026 सौम्यवासरः

प्रातः - सिंहवाहनम्,
17.09.2026 बृहस्पतिवासरः



रात्रौ - मौक्तिकमण्टपवाहनम्
17.09.2026 बृहस्पतिवासरः



प्रातः - कल्पवृक्षवाहनम्
18.09.2026 भृगुवासरः



रात्रौ - सर्वभूपालवाहनम्
18.09.2026 भृगुवासरः



प्रातः - आन्दोलिकायां मोहिन्यवतारोत्सवः
19.09.2026 मन्दवासरः



रात्रौ - गरुडवाहनम्
19.09.2026 मन्दवासरः



प्रातः - हनुमद्वाहनम्
20.09.2026 भानुवासरः



प्रातः स्वर्णरथरङ्गडोलोत्सवः
20.09.2026 भानुवासरः



रात्रौ - गजवाहनम्
20.09.2026 भानुवासरः



प्रातः - सूर्यप्रभवाहनम्
21.09.2026 इन्दुवासरः

रात्रौ - चन्द्रप्रभवाहनम्
21.09.2026 इन्दुवासरः

रात्रौ - अश्ववाहनम्
22.09.2026 भौमवासरः

प्रातः - चक्रस्नानम्
23.09.2026 सौम्यवासरः

रात्रौ - ध्वजावरोहणम्
23.09.2026 सौम्यवासरः



# अनन्तपद्मनाभव्रतम्

- डा.के.कोटेश्वरय्य
चरवाणी - ९९८५१२३२६२

भाद्रपदशुक्लचतुर्दश्यां अनन्तपद्मनाबव्रतदिनम्। उदये मुहूर्तत्रयम् )२-२४ निमेषव्याप्तिविशिष्टचतुर्दशी आवश्यकी। अधमपक्षे मुहूर्तद्वयम् (१-३६ निमेषाः) भवितव्यम्। एत स्मादल्पसमयश्चेत् पूर्वदिनमेव ग्राह्यम्। दिनद्वये सूर्योदयप्याप्तिश्चेत् पूर्णत्वात्पूर्वदिनमेव। अत्र पूर्वाह्णः मुख्यः। तदभावे मध्याह्नः ग्राह्यः। भारतीयकाम्यव्रतेषु इदम् प्रधानम्। अस्मिन् व्रते २४ ग्रन्थिविशिष्टतोरणेन अनन्तः पूज्यः। पूजाविधिः शास्त्रोक्तप्रकरमाचरणीयम्। (उद्यापनव्रतग्रन्थः) पूजोद्दिष्टे तोरे नष्टे आचार्यस्य निवेदयित्वा तदनुज्ञया यथा शक्ति कृच्छ्रादिप्रयशितत्तं कृत्वा याज्येन १०८ पर्यायं वामदेवद्वादशाक्षरमन्त्रमुच्चरन् होमः विधिः आचरणीयः। ततः केशवादिनामभिः होमंकृत्वा समाप्यनन्तरं नूतनतोरके पूर्ववत्पूजा कर्तव्या(धर्मसिन्धुः मूलम्)

अनन्तव्रतस्य १. यमुनाजलपूजनम्

२. अनन्तपूजा ३. प्रतिसरपूजा इति त्रीण्यङ्गानि यमुनाजलप्रत्येकपूजायाः

**प्रत्येककथा -**

यमुनानदीतीरे मुत्रानामकग्रामे एकस्य ब्राह्मणस्य बहुलानामकधेनुरासीत्। भाद्रपदशुक्लचतुर्दश्यां यमुनातीरतृणखादनसमये व्याघ्रे आगत्य खादितुं सन्नद्धे सति साधेनुः तदा मम एकः वत्सः वर्तते। अहं तं मिलित्वा व्याघ्राहारः भविष्यामि। पुनरागमिष्यामि इति तत्कालसमुचितोपदेशं कृत्वा आगमिष्यामीति वाग्दानञ्चकार। व्याघ्रः अङ्गीचकार। ततः सा धेनुः वत्ससकाशं गत्वा तेन स्वक्षीरं पाययित्वा प्रतिनिवृत्ता। हठात् प्रमादात् व्याघ्रः मृतः। मृतशरीरं पूर्वजन्मसंस्कारात् सः याघ्रस्य आत्मा एवं धेनुमुवाच त्वं तव वत्ससकाशं गच्छ इति भाद्रपपशुक्ल चर्तुदशी दिनमिदम्। अस्मिन्दिने गोदानात् गोसम्पदभिवृद्धिः व्याघ्रदिक्रूरमृगपीडा न स्यात्। एतस्य इयं यमुनानदी एव साक्षी इति। एवं यमुनानदीतोयस्य प्रत्येकपूजनमारब्धम्। एतत्पूजामन्त्रेषु विष्णुरूपिणी सर्वकामप्रदायनी, सर्वपापप्रणाशिनीत्यादि विशेषणानि यमुनायाः प्रसिद्धानि। तस्मात् कालात् यमुनातीरे प्रारब्धमिदं व्रतं हिन्दूदेशे सर्वत्र व्याप्तम्। दक्षिणदेशे वैष्णवब्राह्मणाः श्रद्धया इदं व्रतमाचरन्ति। यमुनातीरस्थाः यमुनाजलं कलशे गृहीत्वा यमुनामाह्वयन्ति।

**अनन्तपूजा -** अनन्तो नाम आदिशेषः, विष्णुः रुद्रः इत्याद्यर्थास्सन्ति। अत्र विष्णुशय्याभूतादिशेषस्यैव। पद्मदलचूर्णेन सप्तफणाकृतिसर्पं चित्रीकुर्वन्ति। दर्भैरपि सर्पचित्रं केचित्कुर्वन्ति। तस्मिन् कलशं निक्षिपन्ति। पूजामन्त्रेषु सहस्रशीर्षसेवा, फणैः सप्तभिराविष्टमित्यादि पदानि सन्ति।

**तोरम् -** अनन्तस्य पुरतः कुङ्कुमयुक्तचतुदर्श ग्रन्थियुक्तंभवितव्यम्। पूजारम्भे पूर्वबद्धतोरमपनीय नवीनतोरेण दक्षिणकरस्य बन्धनंकर्तव्यम्। अनन्तपूजायां चतुर्दश संख्यायाः प्रामुख्यं वर्तते। तदा तिथिः १४, तोरं चतुर्दशसूत्रयुतं चतुर्दश ग्रन्थियुतम्। चतुर्दशपत्रैः पूजा, नैवेद्यस्यापि चतुर्दशवर्गीयफलानि, चतुर्दशवर्गीयधान्यपचनपिष्ट्युतानि अतिरसानि च भवितव्यनि। चतुर्दशवर्षानन्तरं व्रतोद्यापनं कर्तव्यम्।

**महाराष्ट्रे व्रतविधानम् -** महाराष्ट्रे अनन्तचतुर्दशीपूजादिने सायं समयपर्यन्तमुपवासेन कालंयापयित्वा पुरोहितसाहाय्यात् अनन्तपूजां कुर्वन्ति। गृहे पीठमध्ये कलशे गङ्गाजलं निवेश्यक्षीरमिश्रितं कृत्वा रजतनाणकमपि तत्र निवेशयन्ति। कलशे आच्छादनफलकं, तदुपरिकुशतृणनिर्मितशेषविग्रहं निवेशयन्ति। सः विग्रहः शेषशायिविष्णोः प्रातिनिध्यं भवति चतुर्दशपिष्टचूर्णतण्डलैः सह क्षीरशर्करावासनाद्रव्ययुत अपूपपायसादीनि प्रधानानिभवन्ति। तुलसीपत्रफलेषु पूजायां

सहस्रतुलसीदलानि उपयुज्यन्ते। अनन्तव्रतदिनरात्रौ भोजनार्थं बन्धवः आहूयन्ते। अनन्ततोरानि रक्तसूत्रपीताम्बरखण्डेन सह संसिद्धानि कुर्वन्ति। तोरग्रन्थिपूजानन्तरं तत् हस्ते बध्नन्ति। वर्षपर्यन्तमपि पवित्रतया तोरं सर्वैः धार्यते।

**व्रताकथ -** पण्डवैः अरण्यावसक्लेशानुभवसन्दर्भे व्यसनसागरोद्धारकव्रतोपदेशार्थं प्रार्थितः भगवान् कृष्णः भाद्रपदशुक्लचतुर्दश्यां इदं अनन्तव्रतमाचरत इति तानुपदिदेश। तदा धर्मराजेन अनन्तः कः इति पृष्टः कृष्णः अहमेव रात्रिद्दिवादिकालस्वरूपः अनन्तपद्मानाभः इति पूर्वकाले इदं व्रतमाचर्य प्राप्तकालेतु एकं ब्राह्मणमधिकृत्य कृष्णः एवमुवाच - ः कृतयुगे सुमन्तो नाम ब्राह्मणः भृगुमहर्षेः तनयां दीक्षांपर्यणैषीत्। दीक्षासुमन्तयोः सुशीलानाम उदारहृदया पुत्रिका अजायत। कालवशात् दीक्षादिवं जगाम। ततः सुमन्तः वैदिककर्मलोपभयात् अज्ञातस्वभावः सर्वदुर्गुणभूयिष्टां कर्कशनाम्नीं उपयेमे। ततः युक्तविवाहवयस्कां पुत्रीं स्वगृहागतकौण्डिन्यनामक ऋषेः दत्वा पाणिग्रहणं कारयामास। ततः कर्कशानादरणात् कौण्डिव्यः सुशीलाच सुमन्तगृहं परित्यज्य भाद्रपदशुक्लचतुर्दश्यां गच्छन्तौ एकां नदीं प्राप्तौ। तत्र नदीतीरे विवाहिताः स्त्रियः अनन्तपद्मनाभस्वामि - व्रतमाचरन्ति स्म। सुशीला ताः स्त्रीः अनन्तपद्मनाभव्रत - विधानमपृच्छत्। ताः गृहिण्यः एवमूचुः - अनन्तव्रतमिदं अनन्तफलप्रदम्। भाद्रपदशुक्लचतुर्दश्यां नदीस्नानमाचर्य आर्द्रवस्त्रधारिणीभिः गोमयेन स्थलं शुचीकृत्य सर्वतोभद्रनामकाष्टदलपद्मं तत्र निवेश्यम्। पद्ममण्डलपरितः रङ्गवल्लीः दक्षिणपार्श्वे विरचय्य उदकपूरितकलशः तत्र स्थापनीयः। मध्ये कुशैः सप्तफणि सहितानन्तपद्मनाभस्वामी आहूतव्यः। चर्तुदशग्रन्थियुत कुङ्कुमलिप्तनूतनतोरं स्वामिसमीपे स्थाप्यम्। ततः षोडशोपचारपूजा कर्तव्या। गोधूमपिष्टगुड मिश्रिताष्टाविंशति-अतिरसाः नैवेद्यत्वेन देयम्। चतुर्दशवायनानि देयानि। शिष्टवायनानि स्वयं व्रताचरद्भिः भोक्तव्यानि। पूजाद्रव्याणां संख्या अवश्यं चर्तुदशसंख्या भवितव्या। एवं वर्षे, वर्षे नूतनतोरं धारयन्तः चतुर्दशवर्षे उद्यापनं कृत्वा पुनः व्रतमाचरणीयम्।

एतच्छ्रुत्वा तदा सुशीलापि यथाशास्त्रं व्रते भागिनी भूत्वा तोरं धृत्वा पितृदत्तं सक्तुपिष्टं किञ्चित् वायनत्वेन ददौ। तदा कौण्डिन्ये भर्तरि नदीस्नानमाचर्य आगते सति तस्यापि सक्तुपिष्टं दत्वा शिष्टं स्वयमपि चखाद। ततः रथमधिरुह्य प्रयतौ स्वाश्रमं जग्मतुः। अनन्तव्रताचरणात् तदाश्रमः अष्टैश्वर्यसम्पन्नः बभूव। तौ दम्पती च सानन्दं कालं यापयतः स्म। कदाचित् कौण्डिन्यः सुशीलाहस्तधृततोरं वशीकरण यन्त्रमिति भ्रमात् तस्यां कुपितः अनन्तपद्मनाभव्रततोरमित्युक्तेऽपि अतृप्तः कोपेनैव तत्तोरमग्नौ पातयामास। सुशीला अग्निस्थमपि तोरं बहिरानीय क्षीरे निक्षिप्य पवत्रीकृत्य भर्तुकृतमपचारंञ्चक्षमस्वेति भगवन्तं अनन्तं प्रार्थयामास। भर्ता कृतापराधात् अचिरकाले अपगतरसर्वैश्वर्यः अकिञ्चनः बभूव। पश्चात् दारिद्र्यपीडितः अरण्ये सञ्चरन् निराहारः कृशीभूतशरीरः आसीत्। तदा सर्वदुखावस्थायाः अनन्तपद्मनाभस्वामी एव कारणमिति पश्चात्तप्तः तद्दर्शनाभिलाषेण गच्छन् फलभरिताम्रवृक्षमेकं दृष्ट्वा तं अनन्तपद्मनाभिस्वामिनं ज्ञातोऽसि वा सः कुत्र वर्तते इति अपृच्छत्। नाहं जानमीति सः वृक्षःसमादधौ, एवमेव मार्गदृष्टं धेनुं, वृषभं, पुष्करिणीद्वयं गार्दभं, गजञ्चापृच्छत्। नाहं जानामीति तैरपि समाधानात् दुःखपारवश्येन मूर्च्छितः आसीत्। तदा कृपालुः अनन्तः भगवान् वृद्धब्राह्मणवेशे प्रत्यक्षीभूय गृहं निनाय। ततः सः वृद्धः अदृष्टः। तत्स्थाने पद्मनाभस्वामी स्वदर्शनं ददौ। स्वामिनं दृष्ट्वा बहुधा तमस्तैषीत्। सन्तुष्टः भगवान् तस्य वराणि ददौ। वरप्रदानसन्दर्भे मार्गदृष्टान् आम्रधेनुवृषभपुष्करिणी - गार्दभगजवृद्धब्रह्मणानधिकृत्य तैः तथा कथयितुं कारणं किमिति भगवन्तमपृच्छत्। तदा अनन्तः एवं समादधौ -

१. पुरा विद्यावान् ब्राह्मणः विद्यदानानाचरणात् आम्रवृक्षः बभूव २. कश्चित् पूर्वजन्मनिभाग्यावानपि अन्नदानानचरणात् तृणभूमावपि खादितुमसमर्थधेनुः सञ्जातः। ३. पूर्वजन्मनि निस्सारनिष्फलव्यर्थभूदानात् कश्चिद्राजा तृणभूमावपि खादनायोग्यवृषभः अजायत। ४. कश्चित् पूर्वजन्मनि नित्य परनिन्दाकरः अस्मिन् जन्मनि गार्दभः बभूव। ५. कश्चित् पूर्वजन्मनि महात्मभिः प्रदत्तधर्मादायविक्रयात् स्थितिमान् भूतोऽपि अस्मिन् जन्मनि गजः अभवत्। वृद्धब्राह्मणरूपे त्वया अद्यदृष्टः अहमेव पद्मनाभः इत्युक्त्वा ततः अनन्तः अदृश्यः बभूव। ततः कौण्डिन्यः अनन्ताक्षेपदोषपरिहृतः अनन्ते अमितभक्तिपरायणः सञ्जातः। गृहं गत्वा भार्यया सह अनन्तव्रतं भक्तितत्परः चतुर्दशवर्षपर्यन्तमाचचार। तत्फलात् पुत्रपौत्रसम्पत्तिभिः महैश्वर्ययुतः बहुकालं यापयित्वा अनन्ततेजोरूपनक्षत्रमण्डले नक्षत्रं भूत्वा अद्यापि प्रकाशते। इयं कथा अनन्तपद्मनाभव्रताचरणात् गतसर्वैश्वर्यं पुनःप्राप्स्यन्तीति बोधयति।

# वामनजयन्ती

- डा. एन्.गुणवती, चरवाणी - ८९१९६२०२२६



अस्मिन् वर्षे वामनजयन्ती सेप्टम्बर्मासे २३ तिथाविति पञ्चाङ्गे निर्दिष्टम्। विष्णोः दशावतारेषु पञ्चमावतारः वामनावतारः।

**मस्त्यकूर्मवराहश्च नारसिंहश्च वामनः।**
**रामो रामश्च कृष्णश्च बुद्धः कल्किरेव च॥**

बलिचक्रवर्तिनः अहङ्कारं दमयितुं इन्द्राय स्वर्गलोकं पुनः दापयितु अदितिकश्यपयोः कुमारत्वेन वामनरूपे जातः विष्णुः। पदत्रयं बलिं याचित्वा जगत्सर्वं पादद्वयेन आक्रम्य तृतीयपादस्थलाय बलेः शिरसि पादं निक्षिप्य तं पातालं प्रेषयामास। प्रह्लादपौत्रः बलिः राक्षसानां राजा सहस्रयज्ञान् निर्वाह्य इन्द्रं विजित्य स्वर्गं वशीचकार। देवताः बलिं जेतुमसमर्थाः विष्णुं शरणं प्रापुः। विष्णुः कश्यपप्रजापतिदम्पत्योः पुत्रत्वेन जातः ब्राह्मणबालवटुत्वेन बलेः यज्ञशालां जगाम। पदत्रयस्थलं दानरुपेन देयमिति शुक्राचार्येण निरुद्धोऽपि सत्यपालकः बलिः पादत्रयस्थलं दातुमङ्गीचकार। सत्यपालकस्य बलेः भक्तेः वशीभूतः विष्णुः तृतीयपादेन बलिं सुतलं प्रेषितवान् अपि तत्र तस्य रक्षकः आसीत्। अयमवतारः दैवभक्तिविनयनिरहङ्कारनतिफलं विवृणोति। वामनावतारद्वादशीदिने वामनपूजां निर्वहन्ति। आन्ध्रप्रदेशे पश्चिमगोदावरीजिल्लायां प्रग्दिशि अडवल्यां वामनालयः वर्तते। भाद्रपदशुक्लद्वादश्यां श्रवणानक्षत्रे मध्यह्ने वमनावतारः इति धर्मसिन्धौ निर्दिष्टम्।

**व्रताचरणविधानम्** - मध्याह्ने नदीसङ्गमस्नानमाचर्य सुवर्णप्रतिमायां वामनमूर्तिं पूजयित्वा सुवर्णपात्रेण अर्घ्यं देयम्।

१. देवेश्वराय देवाय देवसम्भूतिकारिणे।
प्रभवेसर्व देवानां वामनाय नमो नमः॥
२. नमस्ते पद्मनाभाय नमस्ते जलशायिने।
तुभ्यमर्घ्यं प्रयच्छामि बालवामनरूपिणे॥
३. नमश्शार्ङ्ग धनुर्बाणपाणयेवामनाय च।
यज्ञभुक्फलदात्रे च वामनाय नमो नमः॥

इति अर्घ्यं देयम्। परदिने पूजयित्वा सपरिवारं वामनमूर्तिं -

४.वामनः प्रतिगृह्णाति वामनोऽहं ददामि ते।
वामनं सर्वतोभद्रं द्विजाय प्रतिपादये॥

इति दानं देयम्। द्वादश्यामेव रात्रौ देवपूजा कर्तव्या। तथा कर्तुमनवकाशश्चेत् दिवावेव दधिव्रतं देवाय समर्प्य दधिदानं कृत्वा दुग्धव्रतं संकल्प्यम्। अस्मिन् व्रते क्षीरसमर्पणमिव क्षीरमिश्रितपायसादीनि समर्पणीयानि। क्षीरान्नं समर्पणीयम्। पयोविकारदधितक्रादीनां समर्पणाभावेऽपि प्रसूतगोः क्षीरदध्यादीनि दशदिनान्तरे न ग्राह्यम्।

**भागवते वामनावतारे शुक्रचार्यवचनम्** -
त्रिभिः क्रमैरिमांलोकान् विश्वकायः क्रमिष्यति।
सर्वस्वं विष्णवे दत्वा मूढः वर्तिष्यसेकथम्॥ (८-१९-३३)

**बलिवचनानि** - नह्यसत्यात् परोऽधर्मः इति होवाचभूरियम्।
सर्वं सोढुमहं मन्ये ऋतेऽलीकवरं नरम्॥
नाहं बिभेमि निरयान्नानाधन्यादिसुखार्णावात्।
न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलम्भनात्॥ (८-२०-५)

**बलिभार्याविध्यावलिः** -
विन्ध्यावलिः तथागत्य पत्नी जालकमालिनी(मल्लिका)।
आनिन्येकलशं हैममवनीजन्यपां भृतम्॥ (८-२०-१७)
तद्वामनं रूपमवर्धताद्भुतं हरेरनन्तस्य गुणत्रयात्मकम्।
भूःखंदिशोद्यौर्विवराः पयोधयः तिर्यङ्नृदेवाः ऋषयो यदासच॥ (८-२०-२१)
पदं द्वितीयं क्रमशस्त्रिविष्टपं न वै तृतीयाय तदीयमण्वपि।
उरुक्रमस्यांघ्रिरुपर्युपर्यथो। महर्जनाभ्यां तपसः परं गतः॥ (५-२०-३४)

**बलिवचनम्** - यद्युत्तम श्लोक भवान् ममेरितं वचो व्यलीकं सुरवर्य मन्यते।
करोमृतं तन्नभवेत्प्रलम्भनं पदं तृतीयं कुरु शीर्ष्णि मे निजम्॥
एष दानवदैत्यानामग्रणीः कीर्तिवर्धनः।
अजैषीदजयां मायां सीदन्नपिन मुह्यति॥

**विष्णुवचनानि** - एषमेप्रापितः स्थानं दुष्प्रापममरैरपि।
सावर्णान्तरस्यायं भविते द्रोमदाश्रय॥ (८-२२-३१)
रक्षिष्ये सर्वतोऽहंत्वां सानुगं सपरिच्छदम्।
सदा सन्निहितं वीर तत्र द्रक्ष्यते भवान्॥ (८-२२-३५)

**बलिवचनानिः** - अहो प्रणामाय कृतस्समुद्यमः प्रपन्न भक्तार्थविधौ समाहितः।
यल्लोकपालैस्तदनुग्रहऽमरैलब्धपूर्वोऽपसदुदेऽसुरेऽर्पितः॥
एवमिन्द्राय भगवन् प्रत्यानीय तिविष्टपम्।
पूरयित्वाऽदितेः काममशासत्सकलं जगत्॥

**प्रह्लादमुद्दिश्य - विष्णुः** - वत्सप्रह्लाद भद्रं ते प्रयाहि सुतलालयं।
मोदमनस्स्वपौत्रेण ज्ञातीनां सुखमावह॥



# सङ्कष्टहरव्रताचरणम्

## श्रीकृष्णे निन्दापरिहारः

- डा. वि.माधवरेड्डि
चरवाणी - ९९४८५२३२५९

श्रावणकृष्णचतुर्थ्यां संकटचतुर्थीव्रतमाचरन्तीति स्मृतिकौस्तुभवचनम्। बहुलाचतुर्थ्यपि अस्याः नामन्तरं वर्तते। अस्मिन्दिने गोपूजामप्यचरन्ति। एतद्व्रताचरणात् समस्तल्क्लेशपरिहारः इति फलश्रुतौ प्रोक्तम्। पूजाविधिपरिशीलनात् गणपतिपूजासम्बन्धिव्रतमिदमिति ज्ञायते। श्रावणबहुलपक्षेचतुर्थ्यां चन्द्रोदयपर्यन्तं उपवासनियमः अनसुरणीयः। चन्द्रोदयानन्तरं गणपतिपूजा निर्वहणीया। ईश्वररावणश्रीरामधर्मजश्रीकृष्णादिभिः पुरुषैः पार्वतीदमयन्ती अहल्यादिस्त्रीभिरपि व्रतमिदमाचरितमिति व्रतकल्पेप्रोक्तम्।

द्वापरे श्रीकृष्णेनापि श्यमन्तकमण्यपहरणनिन्दां परिहर्तुं इदं संकष्टहरणव्रतमाचरितमिति पौराणिकी गाथा इत्थं विव्रियते- यदुवंशे सत्राजित्प्रसेननायक द्वौ सोदरौ निघ्नकुमारावास्ताम्। सत्राजितः सूर्यभगवानिष्टदैवमासीत्। दिने दिने सूर्यभगवदाराधनात् सन्तुष्टः सूर्यः प्रत्यक्षीभूतः सत्राजिता नमस्कृतः अभीष्टं वरं दास्यामीत्यवोचत्। तदा सत्राजित् सूर्यात् श्यमन्तकमणि मयाचत। भगवान् सूर्यः श्यमन्तकमणिं स्वकण्ठादपनीय सत्राजिते ददन्नेवमुवाच। ''दिव्यमणिः पवित्रमनसा धृतश्चैत् दिने दिने ८''बारुव''तुलाभारं सुवर्णं दास्यति। एतन्मणिस्थदेशे अनावृष्टि, ईति बाधाग्निवायुविषकुम्भोपद्रवाः दुर्भिक्षादयः न भवेयुरिति अशुच्या धारणात् धर्तुः मरणमेव स्यादित्युवाच।'' एतान् सर्वान् विषयान् ज्ञात्वापि सत्राजित् सूर्यात् मणिमिमं स्वीकृत्य धृत्वा पुरवीथीषु सञ्चरन्नासीत्। द्रष्टारः पौराः तन्मणिकान्तेः आश्चर्यचकिताः सूर्यभगवानेव श्रीकृष्णदर्शनार्थमाराच्छतीति सम्भाव्य कृष्णाय वार्तामिमां निवेदयामासुः। श्रीकृष्णः तादृशं रत्नं प्रभुसन्निधौ विद्यमानञ्चेत् देशाभिवृद्धये प्रजाक्षेमाय उपयुक्तं स्यादिति तन्मणिं उग्रसेनाय दातुमैच्छत्। एतं विषयं ज्ञात्वा कृष्णाय तन्मणिं दातुमनिच्छन् सत्राजित् स्वसोदराय प्रसेनाय ददौ। प्रसेनः तन्मणिं धृत्वा मृगयाविहारार्थमटवीं जगाम। किञ्चित्समयानन्तरं अपरिशुभ्रताकारणात् अशौचमवाप। तत्कारणादेवप्रसेनः अटव्यां सिंहादम्रियत। तं सिंहं जाम्बवन्नाम भल्लूकः हत्वा तन्मणिं नीत्वा स्वगुहां गत्वा तत्र सुकुमार नामकस्वपुत्राय खेलनार्थं ददौ।

भाद्रपदशुक्लपक्षचतुर्थीदिनं तत्। तस्मिन्दिने श्रीकृष्णः अप्रयत्नतया ऊर्ध्वमुखः आकाशे चतुर्थीचन्द्रबिम्बमपश्यत्। ततः पूर्वमेव देशप्रयोजनार्थं मणिः श्रीकृष्णेन अर्थितः इति कृष्णः एव प्रसेनं हत्वा मणिमपाहरदितिपौराः मेनिरे। इममपवादं निवारयितुं श्रीकृष्णः तदनन्तरदिने अटवीं गत्वा अन्वेषणात् शल्यानि जीर्णवस्त्राणि खण्डिताभरणान्यपश्यत्। प्रसेनं क्रूरमृगः जघानेत्यमन्यत। ततः पुरोगच्छन् अश्वपादमुद्राः अपश्यत्। ततः सिंहपादमुद्राः अप्यपश्यत्। श्यमन्तमणिस्तु न दृष्टः। श्रीकृष्णमनुसृत्य आगताः सत्राजित्सन्निहिताः कृष्णः एव पूर्वदिने प्रसेनं हत्वा श्यमन्तकमणिं जग्राहेति रात्रौ सिंहः प्रसेनं तमश्वञ्च खादितवान् स्यादिति निष्ठूरवचनान्युवाचुः। एतमपवादं परिहर्तुं श्रीकृष्णः पुनस्स्वान्वेषणप्रयत्नादविरतः किञ्चिद्दूरं गत्वा सिंहकलेबरमपश्यत्। तस्मात् स्थानात् भल्लूकपादमुद्राः अपश्यत्। तत्पादमुद्राः अनुसृत्य गच्छन् एकां गुहां प्रविवेश। तत्र काचिद्युवतिः बालं डोलायां चालयतिस्म। डोलोपरि खेलनवस्तुत्वेन श्यमन्तकमणिः बद्धः आसीत्। डोलाचालिका जाम्बवती। सा कृष्णं दृष्ट्वा तत्सौन्दर्यपरवशा भूत्वा कृष्णः श्यमन्तकमण्यर्थमेवागतः इति मत्वा उच्चैः स्वरकरणात् जाम्बवानागत्य कृष्णस्यहानिं करिष्यतीति भीता गीतालपनं कुर्वतीव नटन्ती श्यमन्तकमणेः स्वगुहागतविषयं कृष्णाय प्रोवाच। सिंहः प्रसेनमवधीत्। सिंहो जाम्बवता हतः। सुकुमारकुमार! ''तव ह्येषः श्यमन्तकः। तदा अन्तःनिद्रास्थः जाम्बवान् उत्थाय श्यमन्तकमण्यर्थं कृष्णः आगतः इत्यनुमान्य कृष्णेन द्वन्द्वयुद्धमकरोत्। स एव कृष्णः रामावतारे



एको न गच्छेरध्वानं नैकश्चार्थान् प्रचिन्तयेत्।

जाम्बवतः चिरञ्जीवित्ववरं ददौ। जाम्बवान् रामावतारे रामालिङ्गणाभिलाषयुक्तः आसीत्। कृष्णः तदभिलाषं पूरयितुं जाम्बवता २१ दिनानि युद्धञ्चकार। क्रमशः क्षीणबलः जाम्बवान् कृष्णः एव रामः इति तत्पादपतितः प्रार्थयित्वा श्यमन्तकमणिं स्वसुतां जाम्बवतीञ्च विवाहे कृष्णाय दत्वा सगौरवं प्रेषयमास।

द्वारकानगरपालकेभ्यः कृष्णः एतत्सत्यं विज्ञाप्य श्यमन्तकमणिं सत्राजिते ददौ। सत्राजिदपि स्वदोषं ज्ञात्वा श्रीकृष्णं क्षमार्थं संप्रार्थ्य स्वपुत्रीं सत्यभामां श्यमन्तकमणिञ्च श्रीकृष्णाय ददौ। एत्समये पाण्डवाः कुन्ती च लाक्षागृहे मृताः इति असत्यवार्तां श्रुत्वा कृष्णः ते सजीवाः एवेति ज्ञात्वा धृतराष्ट्रं सात्त्वयितुं लौकिकमर्यादेति हस्तिनापुरं जगाम।

यादवेषु शतधन्वा कृतवर्मा, अक्रूरः इति त्रयः प्रमुखाः आसन्। सत्यभामां श्रीकृष्णय परिणये दानात्पूर्वं एते त्रयः सत्यभामां विवाहे तेभ्यः दातुमपृच्छन्। तेषु कस्मैचित् सत्यभामां दातुं सत्राजित् वाग्दानमपि चकार। परन्तु कृष्णेन सत्यभामा स्वीकरणात् द्वेषयुताः त्रयः एकीभूय कृष्णे गृहाभावसमये सत्राजितं हत्वा श्यमन्तकमणिमपहर्तुं शतधन्वं प्रेष्यामासतुः। सः तथैव कृत्वा मणिमक्रूराय दत्वा पलायितः।




श्रीकृष्णः विषयमेनं ज्ञात्वा हस्तिनापुरादागत्य सत्यभामां सात्त्वयित्वा शतधन्वहननाय बलरामेण सह रथे प्रस्थानञ्चकार। अश्वे पलायमाने शतधन्वः श्रान्तः अश्वं परित्यज्य धावनञ्चकार। तथा कृष्णः बलरामं रथे एव स्थातुं सूचयित्वा शतधन्वमनुसृत्य गत्वा तं द्वन्द्वयुद्धे जघान। श्यमन्तकमणिस्तु तत्र न दृष्टः। बलरामः कृष्णात् विषयं ज्ञात्वापि बाल्यात् चोरबुद्धिमान् त्वमेव मणिं चोरितवानिति सोदरं कृष्णं विनिन्द्य त्वया सह न वत्स्यामीति भेदमतिः विदेहराज्यं जगाम। अशुचित्वहेतोः प्रसेनः मृतः। मनसिः अशुचित्वहेतोः कृष्णे सन्दिग्धः सत्राजिदपि मृतः। परमभक्तः तात्कालिकतया दैवविरोधभावयुतः अक्रूरोऽपि मनश्शत्त्यर्थं तीर्थयात्रायां काशीनगरं जगाम। तत्र मनश्शान्तिं प्राप्य श्यमन्तकमणितः प्रतिदिनागतसुवर्णं दैवकार्यार्थं उपयोजयति स्म। अक्रूरो बाह्याभ्यन्तरशौचं प्राप्य विद्यमानः काश्यां अतिवृष्ट्यनावृष्टरोगबाधाः नाशयामास। श्रीकृष्णः सोदरात् बलरामात् निन्दाः प्राप्य एकः एव द्वारकानगरं जगाम। मणिविषये स्वपितुः कीर्तिः माभूदिति कृष्णः एव मायाञ्चकारेति जाम्बवतीसत्यभामे कृष्णे अनुमानयुतावास्ताम्। श्रीकृष्णः एतस्याः अपिनिन्दाया कारणंकिमिति अलोचनानिमग्नः आसीत्। तदा नारदः आगत्य भाद्रपदशुक्लचतुर्थ्यां त्वया रात्रौ चन्द्रदर्शनमेव कारणमिति तत्सम्बद्धविशेषान् कृष्णं प्रोवाच। ततः नारदसूचनया विनायकव्रतं भाद्रपदशुक्लचतुर्थ्यां चकार। झटिति विनायकः प्रत्यक्षीभूय त्वदपनिन्दाः विनश्येयुरिति मङ्गलवचांसि प्रोवाच। तदा श्रीकृष्णः सर्वसमर्थोऽप्यहं निन्दापरिहाराय बहूनि संकष्टानि प्राप्तोऽस्मीति समामान्यजनाः कथं निन्दादूराः भवेयुरिति उपायं ब्रूहीति विनायकमपृच्छत्। तदा विनायकः भाद्रपदशुक्लचतुर्थ्यां स्वपूजामाचर्य श्यमन्तकोपाख्यानश्रवणात् चन्द्रदर्शनादागतापनिन्दाः नश्येयुरिति वरं ददौ।

द्वारकानगरे क्षामनिवारणार्थं महाभक्तस्य अक्रूरस्य आगमनमावश्यकमिति श्रीकृष्णः अक्रूरागमनार्थमाह्वानं प्रेषयमास। परमभक्तः अक्रूरः द्वारकानगरमागत्य सर्वेभ्यः श्यमन्तकमणिवृत्तान्तं विज्ञापयामास। श्रीकृष्णे आगताः अपनिन्दाः सर्वाः परास्ताः आसन्। अन्तर्बाह्यशुचिपवित्रतायुते अक्रूरे श्यमन्तकमणिः शुभफलं ददौ। एवं गोपालरत्नगणेश रत्नानुग्रहात् सर्वे आयुरारोग्यैश्वर्याणि प्राप्नुवन्तु।

**ओं शुक्लम्बरधरं विष्णुं शशिवर्णं चतुर्भुजं।**
**प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये।।**


# गोवर्धनगिरिधारी

तेलुगुमूलम् - डि.श्रीनिवासदीक्षितुलु
चित्राणि - श्री के.द्वारकानाथः
संस्कृतानुवादः - डा के.सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०






अन्नो वैभवति बालो पिता भवति मन्त्रदः (मनुस्मृतिः)



सर्वं भीतावहं कोलाहलं जातम्। श्रीकृष्णः यादवप्रार्थनां श्रुत्वा करुणापूर्णहृदयः जातः। झटिति गोवर्धनगिरिं स्ववामाङ्गुल्यां छत्रमिव दधार श्रीकृष्णः।
सर्वे पर्वतस्य अधःस्थानमागच्छन्तु।
सप्तदिनानन्तरं इन्द्रः जागृतः पश्चात्तप्तः प्राप्तबोधः आसीत्। वर्षः प्रशान्तः। सः इन्द्रः श्रीकृष्णं शरणमवाप।
कृष्णं वन्दे देवदेवम्।
देव! अस्मान् क्षमस्व धर्मबद्धं प्रवतिष्यामः। एतादृशदोषं कदापि न करिष्यामः।
श्रीकृष्णः दयया इन्द्रस्य क्षमाभिक्षां ददौ।
इन्द्र! गर्वाहङ्कारौ अनर्थकारणभूतौ स्याताम्।
देवताः श्रीकृष्णे पुष्पवर्षं वर्षापयामासुः, गोवर्धनगिरिं यथास्थाने गोवर्धनगिरिधारी निवेशयामास।
यादवाः सानन्दंभाषन्तः गोगणैः बृन्दावनं जग्मुः।
सर्वे जनास्सुखिनो भवन्तु।

# सेप्टम्बर् 2026 द्वादशराशीनां मासफलानि

- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः, चरवाणी - ९४९०७४१४१४





**१.मेषराशिः -** प्रयाणलाभः, अधिकधनव्ययः, विद्याव्यासङ्गेषु लाभः, सोदरलाभः, वाहनसौख्यम्, आरोग्यम्, आध्यात्मिकचिन्तनं सम्भविष्यन्ति। तदा तदा मनोव्यथा, दुःखं शत्रुपीडा, मासान्ते विशेषधनलाभः सम्भवन्ति। श्रीमहाविष्णोः पूजनं कर्तव्यम्।



**२.वृषभराशिः -** धनागमनचिन्ता, शान्तस्वभावः, भूलाभः, तीर्थयात्राः, पुण्यक्षेत्रसन्दर्शनं, वैराग्यभावना, उद्योगपरिवर्तनं, अधिकारजनप्रशंसाः, वाचसिकाठिन्यभावः, सर्वविद्याव्यासङ्गेषु श्रद्धा सम्भविष्यन्ति। शिवाराधनं करणीयम्।



**३. मिथुनराशिः -** सर्वत्रलाभः, जयः मनोल्लासः कुटुम्बाभिवृद्धिः, भाग्यलाभः, उद्योगजयः, अनूह्यधनलाभः, मनोद्वेगः व्यापारलाभः, आध्यात्मिककार्येषु निमग्नता भविष्यन्ति। तदा तदा वाक्पारुष्यं सम्भवन्ति। महालक्ष्मीपूजनं कर्तव्यम्।



**४.कर्काटकराशि : -** दूरदेशगमनं, विद्यालभः, शरीरकष्टं, मित्रलाभः, तदा तदा ज्वरपीडा, उद्योगपरिवर्तनं, अधिकारजनपीडा सम्भवन्त्यपि सर्वत्रजयः, विद्योद्योग व्यापारकार्येषु नूतनोत्साहः सम्भवन्ति। शिवाराधनं करणीयम्।



**५. सिंहराशिः -** अधिकधनव्ययः, भूलाभः, सोदरद्वारा लाभः, धनागमनं बन्धुसमागमः, अधिकधनव्ययः, उद्योगपरिवर्तनं च भविष्यन्ति। नवग्रहाराधनं कर्तव्यम्।



**६. कन्याराशिः -** धनलाभः, उत्साहः, बन्धुमित्रसमागमः, भूलाभः, उद्योगलाभः कुटुम्बाभिविद्धिः सम्भविष्यन्ति। दैवदर्शनं, तीर्थयात्रा, पुण्यनदीस्नानं, मनोल्लासः, कार्यजयः अधिकारजनप्रशंसाः सम्भवन्ति। महालक्ष्म्याराधनं कर्तव्यम्।



**७. तुलाराशिः -** सर्वत्रजयः, आरोग्यं, उत्साहः, मृष्टान्नभोजनं, अधिकारजन द्वाराप्रशंसाः, विद्योद्योग व्यापारेषु लाभः, सम्माननं भविष्यन्ति। धनव्ययः, मनोदुःखं, तदा तदा सम्भवन्ति। शिवाराधनं करणीयम्।



**८. वृश्चिकराशिः -** मनोव्यथा, ज्वरबाधा, प्रयाणनष्टं वैराग्यभावना सम्भवन्त्यपि भाग्यलाभः, उद्योगजयः, सद्व्ययः अधिकारणनप्रशंसाः, बन्धुमित्रसमागमः सम्भवन्ति। महालक्ष्मीपूजा कर्तव्या।



**९. धनूराशिः -** अधिकधनव्ययः, भाग्यलाभः, उद्योगव्यापारादिषु लाभः, बन्धुमित्रसमागमः, अनूह्यधनलाभः, आध्यात्मिकजीवनेच्छा वाहनलाभः, तीर्थयात्राप्रसङ्गः, तदा तदा ज्वरपीडा सम्भवन्ति। गुरुग्रहाराधनं कर्तव्यम्।



**१०. मकरराशिः -** सर्वत्रलाभः, उद्योगोन्नतिः अनूह्यधनागमनं, अधिकारजनप्रशंसा, आध्यात्मिकलाभः सोदरलाभः, अपरिष्कृतकार्याणांपरिष्कारः बन्धुमित्र-समागमः दैवदर्शनम् सम्भवन्ति। सूर्यग्रहाराधनं करणीयम्।



**११. कुम्भराशिः -** शरीरोद्वेगः वाक्पारुष्यं धनव्ययः, भूगृहव्यापारादिषु धनव्ययः, सोदरचिन्ता, सम्भवन्त्यपि सर्वकार्येषु प्रासङ्गिकता, उद्योगलाभः सम्भविष्यन्ति। पुण्यक्षेत्रदर्शनं भविष्यन्ति नवग्रहाराधनं कर्तव्यम्।



**१२. मीनराशिः -** तदा तदा शरीरस्य अस्वास्थ्यं, दुःस्वप्नाः निद्राभङ्गः, मनोव्याकुलता, सम्भवन्त्यपि कुटुम्बलाभः, धनागमनं भूलाभः, सोदरमित्रादीनां विशेषसमागमः सम्भवन्ति। श्रीमहाविष्णोः आराधनं करणीयम्।



अनपेक्ष्य गुणागुणौ जनः स्वरुचिं निश्चयतोऽनुधावति (शिशुपालबधम्)

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D., P.G.Dip in JMC on behalf of Tirumala Tirupati Devasthanams and Printed and Published at Tirumala Tirupati Devasthanams Press, K.T. Road, Tirupati-517 507. Editor: Dr.V.G. Chokkalingam, M.A., Ph.D. P.G.Dip in JMC.



17.07.2026 तिथौ तिरुमलवेङ्कटेश्वरस्वामिमन्दिरे अणिवरास्थान सन्दर्भे तमिलनाडुस्थ श्रीरङ्गम् श्रीरङ्गनाथस्वामिपक्षतः पवित्रपीताम्बरं समर्पितम्। अस्मिन्कार्यक्रमे श्री श्री महाजिय्यरुस्वामी, लघुजिय्यरुस्वामी, तमिलनाडु देवादायशाखामात्यः श्रीरमेशः सचिवश्रीविनयेन सह अन्याधिकारिणश्च भागं गृहीतवन्तः।



03.07.2026 तिथौ तिरुपतिस्थ वकुलमातामन्दिरे अक्षरगोविन्द अन्नप्रासशुभकार्यक्रमः शास्त्रोक्तरीत्या प्रारब्धः।अस्मिन्कार्यक्रमे ति.ति.देवस्थान पालकमण्डल्यध्यक्षः ति.ति.देवस्थान कार्यनिर्वहणाधिकारी, संयुक्तकार्य निर्वहणाधिकारी, ति.ति. देवस्थानपालकमण्डली सभ्यैः सह अन्याधिकारिणः च भागं गृहीतवन्तः।




05.06.2026 तिथौ ति.ति.देवस्थान वैद्यालये श्रीवारिवैद्यसेवा नामकनवीनकार्यक्रमः आयोजितः। एतत्सम्बन्ध ऐ. टी. प्रारम्भ कार्यक्रममे ति.ति.देवस्थान कार्यनिर्वहणाधिकारी शुभारम्भश्चकार। अस्मिन्कार्यक्रमे ति.ति.देवस्थानुबन्धकार्यनिर्वहणाधिकारी सि.वि.यस.ओ, वैद्याधिकारिणा सह अन्यनाधिकारिणः च भागं गृहीतवन्तः।



10.07.2026 तिथौ तिरुपति चन्द्रगिरिस्थ श्रीकोदण्डरामस्वामि मन्दिरे श्रीमहालक्ष्मीदीपपूजाकार्यक्रमः महावैभवोपेततया सम्पन्नः। अस्मिन्सन्दर्भे ति.ति.देवस्थानानुबन्ध कार्यनिर्वहणाधिकारी, संयुक्तकार्यनिर्वहणाधिकारि च भागं गृहीतवन्तौ।



08.07.2026 तिथौ पालकमण्डलीपदसदस्यरूपत्वेन आन्ध्रप्रदेश देवादायशाखासचिवः श्री के.कन्नाबु ऐ.ए.यस्., महाशयः प्रमाणमकरोत्। अस्मिन्सर्दर्भे अनुबन्ध कार्यनिर्वहणाधिकारी सि.वि.यस्.ओ. महाशयश्च भागं गृहीत्वा अस्य चित्रपटं तीर्थप्रसादश्च ददतुः।



10.08.2026 तिथौ ति.ति.देवस्थानस्य नूतन संयुक्तनिर्वहणाधिकार विद्यावैद्याधिकारत्वेन कार्यभारस्वीकरणं कुर्वन् श्रीप्रभलगोपीनाथ ऐ.ए.यस्., महाशयः तिरुमल श्रीवेङ्कटेश्वरस्वामिमन्दिरे भगवद्दर्शनानन्तरं प्रमाणं चकार। अस्मिन्सन्दर्भे देवालयाधिकारणिः तीर्थप्रसादमस्मै ददुः।

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY Published by Tirumala Tirupati Devasthanams Printing on 25-08-2026 & posting at Tirupati RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal Regd. No. TRP/154/2024-2026 "LICENCED TO POST WITHOUT PREPAYMENT No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 1st of every month.



रथोत्सवः

22.09.2026